वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# कुमारसम्भवमहाकाव्यस्य विद्यामाधवीयव्याख्यानस्य वैशिष्ट्यम्

**डॉ. दीनानाथ दास[१]**

असारमिदं जगत् प्रतिपदमायासयति प्राणिनः, दशर्यति अनिष्टम्, जनयतिचोद्वेगमित्याकलय्य महीयांसः कवयो लोकोत्तरानन्दस्य जनकतया चतुर्वर्गफलस्य च प्राप्तये काव्यात्मिकां सारस्वतीं सृष्टिमरचयन्। अत एव प्रभुसम्मितवेदादिशास्त्रेभ्यः सखिसम्मितपुराणेतिहासेभ्यश्च विलक्षणा सत्कविभणितिः मधुरमभिदधती मञ्जुभाषिणी कामिनीव प्रवणयति मानवमनांसि शुभैकनिदानेष्व-भ्युपायेषु। अत एवोक्तम्-

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।।**

काव्यं नाम कवेः कर्म। कविश्च क्रान्तद्रष्टा भवति। सोऽपि न केवलं सङ्कुचितं परिमितं वा अर्थजातं पश्यति, न वा केवलो मनुष्योऽहमिति कृत्वा मानवीयान् भावान् एव साक्षात्करोति, अपि तु तस्य कृते विश्वस्मिन् विश्वे निर्मुक्ता विस्तृता च स्थली वर्तते। स सरित्प्रवाहे मधुरं गानं शृणोति, क्वचिच्च आकर्णयति वयसां विरावे वनदेवतानां सन्देशम्, प्रकाशयति चापरत्र प्राच्यां चन्द्रोदये वनितासुखसम्भोगम्, ख्यापयति चान्यत्र नायिकामुखकमलचन्द्रमसा तुल्यम्। स कालातीतां रचयति, देशातीतां दर्शयति, परोक्षयति, भूतं भावयति, जडं चेतनयति, निर्बलं सबलयति, किं बहुना अधरीकरोति ब्रह्माणमपि विरचय्यापूर्वमपारं काव्यसंसारम्।

गन्तव्यमेकंपन्थानो नैकधा। सूत्रमेकं व्याख्या विभिन्ना। विवेच्यविषयोऽप्येको विवेचनाऽनेकधा। संस्कृतसाहित्योद्याने पञ्चमहाकाव्यरूपकपुष्पाणि विकसन्ति। तेषु पञ्चमहाकाव्यरूपकपुष्पेषु कालिदासेन रचितं कुमारसम्भवपुष्पमन्यतमत्।

---

[१] Assistant Professor in Sanskrit OPS Mohavidyalaya, Dhenkanal, Odisha.

प्रायशः षट्त्रिंशत् टीका उपलभ्यन्ते, एतेषु षट्त्रिंशं व्याख्याकारेषु विद्यामाधवविरचितेन विद्यामाधवीयटीका अन्यतमा। टीकायां व्याख्यानकौशलम् अतीव मनोहरम्। अस्याः टीकायाः एकविंशतिः मातृकाप्रतिकृतयः नानामातृकाग्रन्थालयेषु सन्ति। अस्याः टीकायाः मातृकाः मलयालमदेवनागरीलिपिषु GOML, Trivandrum तथा अन्यान्यमातृकासङ्ग्रहालयेषु उपलभ्यन्ते।

अयं च विद्यामाधवः गुणवती ग्रामवासी। विद्यामाधवस्य पितामहः रत्नगिरी तथा पितुर्नाम नारायणसूरिः च आस्ताम्। तस्य विद्यामाधवस्य पितामहः शास्त्रेषु प्रवीणः आसीत्। तन्नामानुगुणं ग्रामस्य नाम गुणवती इति प्रसिद्धिं गतम्। अयं वस्तुतः वङ्गप्रान्ते जनिमलभत। परन्तु तस्य वंशजाः दाक्षिणप्रदेशं समागत्य दाक्षिणात्ये कर्णाटकराज्ये न्यवसन्। अतः एव विद्यामाधवः वङ्गीय इति प्रमाणी- कुर्वते केचन। अयं वङ्गीयप्रान्तीय इति Calcutta Oriental Journal. 1934-35 ग्रन्थं पठित्वा वक्तुं शक्यते; परन्तु विद्यामाधवः तृतीयसोमेश्वरस्य समकालिकः इति। पार्वतीरुक्मणीयमहाकाव्ये स्वयं बाणभट्ट-सुबन्धु-कविराजाख्यानां त्रयाणां कवीनां नामग्रहणेन विद्यामाधवः तेषां परवर्तीति ज्ञातुं शक्यते।

## व्याख्याया गारिमा

व्याख्यानकर्ता विद्यामाधवः आदौ इष्टदेवतानमस्कारार्थं तथा सर्वमङ्गलमाङ्गल्यार्थं पार्वती-परमेश्वरयोः नाम स्वीकृत्य कविकुलमुकुटालङ्कृतिः नितान्तकान्तकवितासृतिः विश्वविमोहनासेचनकृतिः कृती वाचामधिदेवतायाः विलासस्तत्रभवान् कालिदासः सत्काव्यस्य सर्वाभीष्टचतुर्वर्गफललाभहेतुत्वेन जगदम्बाजगदीशयोः मञ्जुलमङ्गललीलाललितं कुमारसम्भवमहाकाव्यं चिकीर्षतीत्याह। तद्यथा-

**श्रीकण्ठार्धमयी मह्यं श्रीविद्यानन्दसम्पदः।**
**देवताभिः स्तुता दद्याद् देवता सर्वमङ्गला।।**
**सर्वमङ्गलदातारौ पार्वती परमेश्वरौ।**
**गणेशस्कन्दसंयुक्तौ वन्दे वाञ्छितसिद्धये।**
**महाकविमहेन्द्रेण कालिदासेन यत् कृतम्।**
**कुमारसंम्भवाख्यां तत् काव्यं व्याख्यातुमारभे।।इति।।**

उदाहरणार्थं यथा प्रथमसर्गे-

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।( १/३ )**

## वल्लभ. -

अनन्तरत्न इत्यादि।। यस्य हिमवतः हिमं तुहिनं सौभाग्यविलोपि रामणीयकविच्छेदि न जातं न सम्पन्नम्। यतः अनन्तरत्नप्रभवस्य प्रभूतोत्कृष्टवस्तुकुलगृहस्य, प्रभवत्यस्मादिति प्रभवः। यद्यसौ बहूनां रत्नानां प्रभवः किमित्येतावता दुष्टस्य हिमस्य वहनं न दोषकृत्याह- यस्मात् बहुनां गुणानां सिन्नपाते समूहे एकः दोषः नश्यति, न दूषयति। यथा शशिनः अमृतस्राविषु मयूखेषु। शशाख्यं लक्ष्म। जातमिति कर्तरि क्तः।।

## विद्यामा. -

अनन्तेति।। अनन्तानामसंख्यानां रत्नानाना म् उत्कृष्टवस्तूनां प्रभवस्योत्पत्तिः अविच्छिन्नरत्नोत्पत्तिकारणस्य यस्य हिमं सौभाग्यविलोपि न जातम्इति कर्तरि निष्ठा रमणीयतापरिहारोनाभवत्। तदेवार्थान्तरन्यासेन साधयति- एको दोषो गुणसिन्नपाते गुणानां योगे निमज्जति हि विनश्यति नाम। बहुलमधुररसनिमग्नतिक्तरसबिन्दुर्यथा मधुरत्वमेव भजते तथा बहुगुणमध्यवर्त्ती दोषोऽपि गुणत्वमेव भजत इत्यर्थः। 'हि गतौ च प्रसिद्धौ चे'ति भोजः। तस्योपमानमाह इन्दोः किरणेष्वङ्कइवामृतमयेषु चन्द्रकिरणेषु कलङ्को यथा निमज्जति दोषाय न कल्पते, तद्वत्। नन्वत्र हिमात्मकं दूषणमेकम्। अनन्तरत्नप्रभवत्वमेको गुण उक्तः तथा च गुणसिन्नपाताभावात् कथं दोषस्य निमज्जनं स्यादिति चेदत्र ब्रूमः। यद्यपि रत्नशब्देन मणय एव विवक्षिताः, तर्हि दोष एव स्यादिति। इह तु रत्नानि स्वजातिविशिष्टानि विवक्षितानि 'रत्नं स्वजातिविशिष्टे' चेत्यमरः। उमाख्यं कन्यारत्नं वैडूर्यादीनि मणिरत्नानि देवदारुप्रभृतीनि तरुरत्नानि मृतसञ्जीवन्यादीन्योषधिरत्नानि गङ्गादीनि सरिद्रत्नानि मानसादीनि सरोरत्नानि कैलासादीनि स्थानरत्नानि औन्नत्यादीनि गिरिगुणरत्नानि। एतेषां प्रभवत्वादत्रापि गुणसिन्नपातोऽस्त्येवेति न दोषः।। स्

## मल्लि.-

अनन्तेति।। प्रभवत्यस्मादिति प्रभवः कारणम्। अनन्तानामपरिमितानां रत्नानां श्रेष्ठवस्तूनां प्रभवस्य यस्य हिमाद्रेः हिमम्। कर्तृ। सुभगस्य भावः सौभाग्यम्। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च'

इत्युभयपदवृद्धिः। तद्विलुम्पतीति सौभाग्यविलोपि सौन्दर्यविघातकं न जातं नाभूत्। तथा हि। एको दोषो गुणसंनिपाते इन्दोः किरणेष्वङ्क इव निमज्जति। अन्तर्लीयत इत्यर्थः। नहि स्वल्पो दोषोऽमितगुणाभिभावक एव किन्तु किश्चिदिन्दुकलङ्कादिवद्गुणैरभिभूयते। अन्यथा सर्वरम्यवस्तुहानिप्रसङ्गादिति भावः। अत्रोपमानुप्राणितोऽर्थान्तरन्यासालङ्कारः। तल्लक्षणं तु 'ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किंञ्चन। तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः' इति दण्डी।।

## समीक्षा-

अस्य श्लोकस्य व्याख्याने वल्लभदेवेन मिल्लनाथेन वा पदानामन्वयः दण्डरूपो न विहितः। अत एव बालानाम् अर्थावगमः स्पष्टतया न जायते। विद्यामाधवव्याख्याने सरलार्थपूर्वकं श्लोके विद्यमानानां पदानामन्वयः कृतः। तद्यथा- 'अनन्तानां रत्नानां प्रभवस्य यस्य हिमं सौभाग्यविलोपि न जातम्'। साधकं वदति 'एको दोषो गुणसिन्नपाते निमज्जति'। उपमानं भवति 'इन्दोः किरणेष्वङ्क इव'। प्रत्येकस्य शब्दस्य अर्थोऽपि तत्तदवसरे दत्तो भवति- अनन्तानामसंख्यानामित्यादि। अर्थान्तरन्यासालङ्कारस्य उल्लेखः कृतोऽस्ति। वल्लभदेवव्याख्याने तन्न दृश्यते। 'एको दोषो गुणसिन्नपाते निमज्जति' इत्यस्य उपमानत्वेन स्वयं कञ्चन दृष्टान्तमपि विद्यामाधवः यच्छति। यथा- बहुलमधुररसनिमग्नतिक्तरसबिन्दुर्यथा मधुरत्वमेव भजत तथा बहुगुणमध्यवर्ति दोषोऽपि गुणत्वमेव भजते इत्यर्थः। एवं न केवलदृष्टान्तकथनं दृष्टान्तः दार्ष्टान्तिकेन साकं सम्यगिन्वतोऽप्यत्र। 'हि' शब्दव्याख्यानाय भोजकोशस्य परामर्शः विहितः। किन्तु अधुनोपलभ्यमानभोजकोशे शब्दोऽयं न लभ्यते। एवं भोजकोशस्य अन्यः कचित् हस्तलेख आसीत् इति वा भोजकोश एव भिन्न आसीत् इति वा एतेन ज्ञायते। तथावत् क्रियानिघण्टुः कोशग्रन्थे नोपलभ्यते। व्याख्यायामस्यां अनन्तरत्नप्रभवस्य इति पदस्य व्याख्यानावसरे 'नन्वत्र हिमात्मकम्' इति पूर्वपक्षम् उद्धाव्य 'रत्नं स्वजातिविशिष्टे' चेत्यमरः इति उद्धावितशङ्कायाः सप्रमाणं निरासः कृतः। मिल्लनाथव्याख्याने वल्लभदेवव्याख्याने च यद्यपि 'रत्नानाम्' इति पदस्य यथाक्रमं 'श्रेष्ठवस्तूनाम्' इति 'उत्कृष्टवस्तूनाम्' इति च अर्थः प्राप्यते तथापि कानि तानि उत्कृष्टवस्तूनिइति ज्ञातुं विद्यामाधवीयमेव आश्रयणीयं भवति। उक्तप्रकारेण अमरकोशमृद्धत्य व्याख्याकारः व्याख्यायति- 'उमाख्यं कन्यारत्नं वैडूर्यादीनि मणिरत्नानि देवदारुप्रभृतीनि तरुरत्नानि मृतसञ्जीवन्यादीन्योषधिरत्नानि गङ्गादीनि सरिद्रत्नानि मानसादीनि सरोरत्नानि कैलासादीनि स्थानरत्नानि औन्नत्यादीनि गिरिगुणरत्नानि' इत्येवं सहृदयानां मनसि अनायासेन चारुतया

सिन्नवेशोऽनया व्याख्यया जायते। व्याकरणविवेचनं मिल्लनाथव्याख्याने यथा अधिकं दृश्यते तथा अकृत्वा सामाजिकानां हृदि नीरसम् अनुत्पाद्य तेषां परमानन्दलाभाय दृढव्रती व्याख्याकार इति बोध्यते।

**दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।**
**क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव।।( १/१२ )**

## वल्लभ.-

दिवाकरादित्यादि।। यो नगो दरीषु लीनं तमोऽर्काद्रक्षति। दिनेऽपि भीतमिव सभयः किलान्यस्माद्रक्षति। ननु दुष्टस्य रक्षायां क इवास्य गुण इत्याह। उच्चैः शिरसामुन्नतानां क्षुद्रेऽपि शरणं प्राप्ते निश्चतं सतीव साधौ यथा ममत्वमात्मीयत्वं भवति। गुण्यागुण्याविचारेण महन्तः शरणागन्तं पालयन्तीत्यर्थः। ममत्वमिति षष्ठ्यन्तपतिरूपको निपातः।।

## विद्यामा. -

दिवाकरादिति।। दिवाकरात् सूर्यात् भीतमिव गुहासु लीनमन्धकारं यो दिवा अिह्नरक्षति अथवा भीतमिव गुहासु लीनमन्धकारं यो दिवाकराद्रक्षतीत्यन्वयः। '**भीत्रार्थानां भयहेतुरि**'ति पञ्चमी, दिवाभीतमुलूकमिव गुहासु लीनमिति केचिदाहुः। 'काकवैरी दिवाभीत उलूकः कौशिकाह्वय' इति दुष्टस्यान्धकारस्य रक्षणं दूषणमेव। तस्य तत्कथं गुणत्वेनोच्यत इत्याशङ्क्याह- उच्चैश्शिरसामुन्नतानां शरणं प्रपन्ने क्षुद्रेऽपि ममत्वं नूनं मदीयोऽयमित्यभिमानत्वं प्रायो भवति। नूनं सतीव सज्जन इव यथा साधौ प्राप्ते ममत्वं स्यात्तथा क्षुद्रेऽपि भवतीत्यर्थः। ममेतिषष्ठ्यन्तप्रतिरूपको निपातः। ननु शरणागते ममत्वं नूनमिति वक्तुं न शक्यते त्रातव्य एव। '**धर्मज्ञैर्वध्योऽपि शरणागत**' इति धमर्शास्त्रात्। तस्मादपि वध्यं प्रपन्नं प्रति प्रयच्छन्तीति यजुर्वेदवाक्याच्चात्रायथार्थवाचिनो नूनमित्यस्य शब्दस्य प्रयोगो दोषः किं न स्यादिति चेत् सत्यमेवं तथाप्येतद्दोषपरिहाराय योजनान्तरं ब्रूमहे। उत्तरार्धे स्थितो 'नूनं' शब्दः पूर्वार्धवाक्ये रक्षति नूनमित्यत्र योज्यः। तथा सति पूर्वार्ध उत्प्रेक्षान्वयस्य चेतनारहितस्यान्धकारस्य भयाऽनुपपत्तेर्भीतमिवेत्युत्प्रेक्षा यस्य गुणानां महत्त्वात् रविकरसम्पर्काभावात्तासु दिवाप्यन्धकारे तिष्ठतीति यथार्थः। यस्तं रक्षति नूनमित्युत्प्रेक्षा एवं सति न किश्चद्दोषः। 'नूनं तर्केऽर्थनिश्चये' इति निश्चयार्थे नूनं शब्दः।।

## मल्लि॰-

दिवाकरादिति।। यो हिमाद्रिर्दिवा दिवसे भीतं भयाविष्टमिव। उलूकमिवेति च ध्वनिः। गुहासु लीनमन्धकारं ध्वान्तम्। दिवादिनं करोतीति दिवाकरस्तस्माद्दिवाकरात्। 'दिवाविभानिशाप्रभाभास्कर' इत्यादिना टप्रत्ययः। 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्पञ्चमी। रक्षति त्रायते। ननु क्षुद्रसंरक्षणमनर्हमित्याशङ्क्याह- क्षुद्रे इति। उच्चैः शिरसामुन्नतानां शरणं प्रपन्ने शरणागते क्षुद्रे नीचेऽपि सति सज्जने इव। नूनं ममत्वं ममायमित्यभिमानः। अस्तीति शेषः। ममशब्दात्त्वप्रत्ययः। अर्थान्तरन्यासोऽलङ्कारः।।

## समीक्षा-

दिवाकरात् भीतमिव गुहासु लीनमन्धकार यो दिवा रक्षति अथवा भीतमिव गुहासु लीनमन्धकारं यो दिवाकराद्रक्षतीति द्विधा प्रथमपङ्क्तेः अन्वयो दत्तः विद्यामाधवीये। पूर्वव्याख्याकाराणां केषाञ्चिन्मतं परामृशति- 'दिवाभीतमुलुकमिव गुहासु लीनमिति केचिदाहुः' इति वाक्येन। द्वितीयपङ्क्तेः प्रकरणं सप्रयोजनं निर्दिष्टमस्ति- 'काकवैरी' इत्यारभ्य 'गुणत्वेनोच्यत इत्याशङ्क्याहे'ति पर्यन्तम्। पङ्क्त्यर्थं ज्ञातुम् इदं महदुपकरोति। उच्चैश्शिरसामुन्नतानां शरणं प्रपन्ने क्षुद्रेऽपि सतीव ममत्वं नूनं प्रायः भवतीति अन्वयोऽपि स्पष्टतया लभ्यते। धर्मशास्त्रयजुर्वेदयोः प्रामाण्यं प्रदर्श्य 'नून' मित्यस्य शब्दस्य प्रयोगः दोष इति पूर्वपक्षं कृत्वा नूनमिति शब्दः पूर्वार्धवाक्ये 'रक्षति नूनमिति योजनीयमि'ति प्रकारान्तरेण समाधानं दत्तमस्ति। अनन्तरवाक्येन नूनशब्दस्य यथार्थत्वमुक्त्वा अन्वयोऽपि प्रदर्शितः। वल्लभदेव- व्याख्याने मिल्लनाथव्याख्याने च श्लोकस्य द्वितीयार्धेन सह एव नूनं शब्दस्य अन्वयो विहितो विद्यते। प्रथमार्धेन अन्वयः विद्यामाधवीये युक्त्या कृतो भवति। अनिवार्यस्थान एव व्याकरण- विवेचनं कृतमिस्त। मिल्लनाथव्याख्याने व्याकरणांशानां प्रचुरेणोल्लेखोऽस्ति। इयं रीतिः मुख्यार्थबोधने क्लेशमुत्पादयति। यथा तृतीयसर्गे-

**अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन।**
**न ईश्वरव्याहृतयः कदाचित्पुष्णन्ति लोके विपरीतमर्थम्।।**(३/६३ )

### वल्लभ.-

अनन्यभाजमित्यादि।। भवेन शम्भुना अपि प्रणतेरनन्तरं अनन्यसाधारणं भर्तारं लभस्व इति सा तथ्यमेव उक्ता। तस्याः पश्चात्तेनैवोद्वाहितत्वात्। न चैतदाश्चर्यं यस्मात् ईश्वराणामाढ्यानां समर्थानामुक्तयः पाके फलकाले विपरीतम् अन्यमेव अर्थं न पुष्णन्ति न फलिन्त। देवश्चेश्वरः क्लेशकर्मविपाकदोषैरस्पृष्टत्वात्। अन्यां भजत इत्यन्यभाक्। ततो नञ् समासः।।

### विद्यामा. -

अनन्येति।। अन्यांस्त्रियं नभजत इत्यनन्यभाक्, अन्यशब्दस्य सर्वनामत्वात् पुंवद्भावः, अन्ययोषिद्विमुखं पतिमाप्नुहि लभस्वेति सा गौरी भवेन तथ्यमेवाभिहिता। सत्यमेवोक्ता भव्यमेवेति केचित् पठन्ति। भव्यं भवितव्यं भावीत्यर्थः। ईश्वरव्याहृतयः ईश्वरणां महात्मनामुक्तयः कदाचिदपि विपरीतमन्यथाभवन्तमर्थं न पुष्णिन्त। उक्तमेवार्थं साधयन्ती- त्यर्थः। पाके विपरीतमर्थमिति केषाञ्चित् पाठः। पाके फलकाल इति।।

### मल्लि.-

अनन्येति।। सा कृतप्रणामा देवी भवेन हरेण। अन्यां न भजतीति तम् अनन्यभाजम्। 'भजो ण्वि' इति ण्विप्रत्ययः। सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः। पतिमाप्नुहीति तथ्यं सत्यम् एव अभिहिता उक्तः। तथा हि। ईश्वरव्याहृतयः महापुरुषाक्तयः कदाचित् अपि लोके भुवने। 'लोकस्तु भुवने जने' इत्यमरः। विपरीतं विसम्वादिनम् अर्थम् अभिधेयं न पुष्णन्ति न बोधयन्तीत्यर्थः।।

### समीक्षा-

पार्वत्या नमस्कृतस्य परमेश्वरस्य आशीर्वादप्रकार अस्मिन् श्लोके वर्णितः अस्ति। अनन्यभाजं पतिमाप्नुहि इति सा गौरी तथ्यमेवाभिहिता इति प्रथमार्धस्य अन्वयः। विद्यामाधवीये मातृकान्तरात् पाठभेदः प्रदर्शितः। तद्यथा- 'सत्यमेवोक्ता भव्यमेवेति केचि- त्पठिन्त' इति। भव्यं भवितव्यं भावीत्यर्थः। ईश्वरव्याहृतयः कदाचिदपि लोके विपरीतमर्थं न पुष्णन्ति इति द्वितीयार्धस्य अन्वयः। अत्रापि विद्यामाधवेन पाठभेदः प्रदर्शितः। तथाहि- 'पाके विपरीतमर्थमिति केषाञ्चित्पाठः' इति। पाके इत्यस्य फलकाले इत्यर्थोऽपि दत्तः। वल्लभदेवः 'पाके' इति पाठमाश्रित्य व्याख्यां कृतवान्। मिल्लनाथः 'लोके' इति पाठमाश्रित्य व्याख्याम् अकरोत्। विद्यामाधवः उभयमपि स्पृष्टवानिति विशेषः।

यथा पञ्चमसर्गे-

**अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।**
**अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम्।।( ५/३३ )**

**वल्लभ.-**

अपि क्रियार्थमित्यादि।। अपि इतीष्टप्रश्ने। होमार्थं कच्चित् तव इन्धनदर्भादि सुप्रापं च तोयानि विषाद्यदूषितत्वादभिषेकयोग्यानि कच्चिच्च देहसामर्थ्यमवेक्ष्य प्रवर्तसे व्रतानि कुरुषे न तु मूढाग्रहेण। यस्मात् मुख्यतः शरीरं धर्मसाधनम्। यदुक्तम्- 'शरीरं धर्मसंयुक्तं रक्षणीयं प्रयत्नतः। शरीराज्जायते धर्मः पर्वतात् सलिलं यथा'।। तस्माद्धर्माधारमेतत्। समिधश्च कुशाश्च समित्कुशम्। 'जातिरप्राणिनाम्'।।

## विद्यामा. -

अपीति।। अपिशब्दः प्रश्ने वर्तते। 'अपि समुच्चये प्रश्न' इति भोजः। क्रियार्थम् होमादिक्रियार्थं समित्कुशमपि समिधः कुशाश्च सुलभाः। कच्चित् समित्कुशमिति। 'सर्वो द्वन्द्वो विभायैकवद्भवती'ति एकवद्भावः। जलानि ते तव स्नानविधौ क्षमाणि अपि स्नानक्रियायां योग्यानि कश्चित्? 'शक्ते योग्येऽपि च क्षमा' वररुचिः। त्वं स्वशक्त्या तपसि प्रवर्तसे। सऽपि किश्चत् शक्त्यभावे तप:करणे को दोष इत्याशङ्क्याह- शरीरमाद्यं धर्मसाधनं खलु। शिक्तमतिक्रम्य तपसि क्रियमाणे सति शरीरं न स्यात्। अतः खलु धर्माणामाद्यं साधनभूतं शरीरं रक्षणीयमित्यतः स्वशिक्तमतिक्रम्य तपसि न प्रवर्तनीयमित्यभिप्रायः।।

## मल्लि.-

अपीति।। अत्रापिशब्दः प्रश्ने। क्रियार्थं होमादिकर्मानुष्ठानार्थम्। समिधश्च कुशाश्च समित्कुशम्। 'जातिरप्राणिनाम्' इति द्वन्द्वैकवद्भावः। सुलभम् अपि सुलभं कच्चित्। जलानि ते तव स्नानविधिक्षमाणि स्नानविधिक्षमाणि स्नानक्रियायोग्यानि अपि कच्चित्। किं च स्वशक्त्या निजसामर्थ्यानुसारेण तपसि प्रवर्तसे अपि देहमपीडयित्वा तपश्चरसि कच्चिदित्यर्थः। युक्तं च नामैतत्। खलु यस्मात् शरीरम् आद्यं धर्मसाधनम्। धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते। तेषु च वपुरेव मुख्यं साधनम्। सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते। अत एव 'सततमात्मानमेव गोपायीत' इति श्रुतिः। 'अयथाबलमारम्भो निदानं क्षयसम्पदाम्'। इति भावः।।

**समीक्षा-**

मुनिजनोचितं कुशलं पृच्छन् ब्रह्मचारी आदौ तपस्सम्पदं पृच्छति 'अपि क्रियार्थम्' इत्यादिनाक्रियार्थं' समित्कुशं सुलभम् अपि ? जलानि ते स्नानविधिक्षमाणि अपि ? स्वशक्त्या तपसि प्रवर्तसे अपि? शरीरं आद्यं धर्मसाधनंखलु इत्यन्वयः। विद्यामाधवीये 'अपि समुच्चये प्रश्ने' इति भोजदुद्धृत्य अपिशब्दस्यार्थनिर्धारणं कृतमस्ति। किन्तु अधुना लभ्यमाने भोजनाममालिकायाम् अयं शब्दो न प्राप्यते। भोजकोशः भिन्नः कश्चन आसीदिति वा पूर्वं अपिशब्दान्विता भोजनाममालिका कुत्रचित् प्रचलिता इति वा एतेन ज्ञायते। सप्रयोजनं प्रकरणं दत्तमिस्त विद्यामाधवीये- 'कश्चित् शक्त्यभावे तपः करणे को दोष इत्याशङ्क्य आहशरीरमाद्यं धर्मसाधनं खलु। शिक्तमनतिक्रम्य तपसि क्रियमाणे सति शरीरं न स्यात्। अतः खलु धर्माणामाद्यं साधनभूतं शरीरं रक्षणीयमित्यतः स्वशिक्तमतिक्रम्य तपसि न प्रवर्तनीयमित्यभिप्रायः'।

अन्यासु व्याख्यासु एतावत्स्पष्टं व्याख्यानं न दृश्यते। सर्वेऽपि व्याख्यांशाः सरलतया अवगन्तुं शक्यन्ते। पदानाम् अर्थविश्लेषणं, व्युत्पित्तः, तत्तद्वस्तुगतगुणविशेषख्यापनं तथा भोज-अमर-दिण्ड-वैजयन्ति-हलायुध-वशिष्टसिद्धान्तान् नानाशास्त्राणि च चिन्तयित्वा अत्र सम्यक् रूपेण प्रतिपादितम्।